**209**   209-267124   **I**

Total No. of Questions - **16**
Total No. of Printed Pages - **4**

**Regd. No.**

# Part - II
## SANSKRIT - Paper - II
### (Second Language)

**Time : 3 Hours**     **Max. Marks : 100**

***Note : -***

*(i) All questions should be attempted.*

*(ii) Question Nos. 1, 2, and 3 should be answered either in the medium of instructions of the candidate or in Sanskrit (Devanagari Script).*

*(iii) The remaining questions should be answered in Sanskrit (Devanagari Script) only.*

*निर्देश : प्रथम, द्वितीय, तृतीय –प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः।*

**1.** **एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत –** **1×8=8**

(अ) परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्।।

(आ) उद्यमं साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्।।

**2.** **एकं निबन्ध प्रश्नं समाधत्त –** **1×6=6**

(अ) विभीषणोपदेशः इति पाठ्यभागसारांशं लिखत।

(आ) गीर्वाणवाण्याः वैभवं लिखत।

**3.** **एकं निबन्ध प्रश्नं समाधत्त –** **1×6=6**

(अ) विक्रमस्य औदार्यमिति पाठ्यभागस्य सारांशं लिखत।

(आ) अप्पय्यदीक्षितस्य जीवितचरितं संक्षेपेण लिखत।

4. त्रयाणां प्रश्नानां समाधानानि लिखत – **3×2=6**

(अ) कीदृशं वस्तु तथैव तिष्ठति?

(आ) भृगुवंशकेतुः कः?

(इ) द्रोणद्रुपदयोः सम्बन्धः कीदृशः?

(ई) बालानां कलहः कीदृशः?

(उ) कालिदासश्लोके भोजेन प्राप्तं समाधानं किम्?

(ऊ) कालिदासः महाराजं कथं सन्तोषितवान्?

5. द्वयोः ससन्दर्भं व्याख्यानं लिखत – **2×3=6**

(अ) वदेत् क्षमं स्वामिहितं मन्त्री।

(आ) पिण्डेष्वनास्था खलु भौतिकेषु।

(इ) विद्या यत्र परोपकारविभवाः सा ज्ञानभूमिर्मम।

(ई) वाच्याः कथं मातृपदेन चान्याः।

6. द्वयोः ससन्दर्भं व्याख्यानं लिखत – **2×3=6**

(अ) मृत्युर्वै प्राणिनां ध्रुवः।

(आ) सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना।

(इ) वैद्योऽपि मानव एव।

(ई) राजा तं कनकाभिषेकेण सत्कृतवान्।

7. त्रयाणां प्रश्नानां समाधानानि लिखत – **3×2=6**

(अ) नराः क इव रणे सीदन्ति?

(आ) सुदक्षिणादिलीपौ किमर्थं नन्दिनीधेनोः सेवाम् अकुरुताम्?

(इ) व्याधितस्य मित्रं किम्?

(ई) देवः कुत्र सहायकृत् भवति?

(उ) मानवानां प्रकृतिशुभगुणाः के?

(ऊ) लोके चित्रमतिः कः?

8. त्रयाणां प्रश्नानां समाधानानि लिखत – **3×2=6**

(अ) मन्दविषो नाम सर्पः कुत्र वसति?

(आ) ब्राह्मणः पुत्रप्राप्त्यर्थं कीदृशं व्रतमाचरितवान्?

(इ) राजहंसः कः? तस्य नगरी का?

(ई) मार्गशीर्षमासः कीदृशः आसीत्?

(उ) मञ्जुहासिनी का?

(ऊ) रत्नखेटिश्रीनिवासस्य अभिलाषा का?

**9.** एकेन पदेन समाधानं लिखत – **5×1=5**

(अ) केषां बलानि अमेयानि?

(आ) दिलीपस्य धर्मपत्नी का?

(इ) यावज्जीवं कः दहेत्?

(ई) केन सर्वे वशाः भवन्ति?

(उ) सर्वासु सुतासु कस्याः गुणाः भवन्ति?

**10.** एकेन पदेन समाधानं लिखत – **5×1=5**

(अ) मण्डूकनाथः कः?

(आ) देवदत्तः राजानं कुत्र अनीनयत्?

(इ) राजहंसस्य पत्नी का?

(ई) श्रीधरस्य मातुः नाम किम्?

(उ) वेङ्कटरावस्य पुत्रः कः?

**11.** अधोनिर्दिष्ट कथां पठित्वा प्रश्नानां समाधानानि दत्त – **5×1=5**

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्पटीवृक्षः। तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित्किञ्चित् उद्धृत्य तस्मै ददति। तेन असौ जीवति। तेषां शाबकरक्षां च करोति। अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशाबकान् भक्षयितुं तत्र आगतः। ततस्तम् अयान्तं दृष्ट्वा पक्षिशाबकैः भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेण उक्तम्–"कोऽयमायाति"? इति। दीर्घकर्णो गृध्रमवलोक्य सभयमाह– "हा! हतोऽस्मि। यतोऽयं व्यापादयिष्यति" इति।

**प्रश्नाः –**

(अ) पर्पटीवृक्षः कुत्रास्ति?

(आ) वृक्षस्य कोटरे कः प्रतिवसति?

(इ) मार्जारः किमर्थं तत्र आगतः?

(ई) कोलाहलः कैः कृतः?

(उ) दीर्घकर्णः गृध्रमवलोक्य किमाह?

**12.** नामनिर्देशपूर्वकं त्रीणि सन्धत्त – **3×2=6**

(अ) शरत् + चन्द्रः

(आ) उत् + डयनम्

(इ) अच् + अन्तः

(ई) जगत् + नाथः

(उ) सः + अपि

(ऊ) हरिः + गच्छति



209-2267124

13. त्रीणि नामनिर्देशपूर्वकं विघटयत – 3×2=6

(अ) मनश्चलति

(आ) तट्टीका

(इ) षडाननः

(ई) तन्मात्रम्

(उ) कोऽपि

(ऊ) नृपतिर्जयति

14. द्वयोः शब्दयोः सविभक्तिक रूपाणि लिखत – 2×6=12

(अ) जलमुक्

(आ) सरित्

(इ) पचत्

(ई) यद् (स्त्री)

15. समास नामनिर्देशपूर्वकं त्रयाणां विग्रहवाक्यानि लिखत – 3×2=6

(अ) व्याघ्रभीतः

(आ) अल्पवातः

(इ) नवरात्रम्

(ई) रामलक्ष्मणौ

(उ) प्रत्यक्षम्

(ऊ) महाबलः

16. अधोनिर्दिष्ट पट्टिकामाधारीकृत्य पञ्च साधु रूपाणि लिखत – 5×1=5

| | | |
|---|---|---|
| गणेशः | सत्यं | खादिष्यति |
| कृष्णः | फलं | करिष्यति |
| त्वं | ग्रामं | पठिष्यामि |
| रामः | कदा | वदिष्यति |
| अहं | पाठं | गमिष्यसि |

---------------------------

209-267124